**राष्ट्रिय-अन्वेषण-अभिकरणेन**

राष्ट्रिय-अन्वेषण-अभिकरणेन (एन्. आई. ए.) इत्यनेन रक्तदुर्ग-क्षेत्रस्य समीपे कार-यान-विस्फोट-प्रकरणे प्रथम-प्रमुख-सफलतायाः घोषणा कृता, यस्मिन् राष्ट्रिय-राजधान्यां दश-निर्दोष-जनाः मृताः,अन्ये च पञ्चविंशति-जनाः व्रणिताः अभवन्। अभिकरणेन देहलीतः आमिर राशिद अली नामकं काश्मीर-निवासिनं निगडिितम्, यो हि आतङ्कि-आक्रमणाय आत्मघाती-विस्फोट -प्रकरणे उमर-नबी इत्यनेन सह षड्यन्त्रं कृतवान् आसीत् इति कथ्यते। अभिकरणस्य अनुसारं, आक्रमणे संलग्नं कार्-यानम् अभियुक्तस्य आमिर् राशिद् अली इत्यस्य नाम्ना पञ्जीकृतम् आसीत्। एन्. आई. ए. इत्यनेन अधुनापर्यन्तं त्रिसप्तति यावत् साक्षिभिः सह चर्चा कृता, येषु विस्फोटे व्रणिताः अपि सन्ति।

**बिहार-विधानसभा**

बिहार-विधानसभा-निर्वाचनस्य परिणामस्य घोषणायाः दिनद्वयानन्तरं बिहारस्य मुख्य-निर्वाचन-अधिकारी विनोद-सिंह-गुञ्जियालः राज्यविधानसभायां त्रिचत्वारिंशोत्तर-द्विशतं यावत् नवनिर्वाचितानां सदस्यानां सूची पटना-नगरस्य राजभवने राज्यपालाय आरिफ्-मोहम्मद्-खान्-वर्याय समर्पितवान्। अस्यां सूच्यां एन. डी. ए. पक्षस्य द्वयाधिक-द्विशतं, महाघटबन्धनस्य चतुःत्रिंशत्, ए. आई. एम्. आई. एम्. दलस्य, भारतीयसमावेशकदलस्य, बहुजनसमाजदलस्य च विधायकैः सह सर्वेषाम् प्रत्याशिनां नामानि समाविष्टानि सन्ति। अत्रान्तरे, भारतस्य निर्वाचन-आयोगेन विधानसभा-निर्वाचनस्य, उप-निर्वाचनस्य च आयोजनस्य अनन्तरं बिहारराज्ये, षट् राज्येषु, एकस्मिन् केन्द्रशासितप्रदेशे च आदर्श-आचारसंहिता-अपसारिता।

**बिहार्-राज्ये**

बिहार्-राज्ये विधानसभानिर्वाचनस्य समाप्तेः अनन्तरं नूतनसर्वकारस्य निर्माणविषये एन्. डी. ए-पक्षस्य पञ्च-घटकदलानां मध्ये विचारः प्रचलति। भाजपा, जनता-दल-यूनाईटेड, लोक-जनशक्ति-(रामविलास्) दलं, हिन्दुस्तानी-अवाम्-मोर्चा, राष्ट्रिय-लोक-मोर्चा च इत्येतेषाम् मध्ये नूतनस्य सर्वकारस्य निर्मानस्य विषये, मन्त्रिमण्डलस्य प्रतिनिधित्वस्य विषये, अन्येषु प्रमुखेषु विषयेषु च निरन्तरं चर्चाः प्रचलन्ति। पूर्वं, केन्द्रीय-गृह-राज्यमन्त्री नित्यानन्द-रायः, उपमुख्यमन्त्री विजयकुमारसिन्हा इत्यादयः भाजपेति-दलस्य वरिष्ठ-नेतारः, राष्ट्रियलोकमोर्चा-अध्यक्षेन उपेन्द्रकुशवाहा इत्यनेन सह, पटना-नगरे जे. डी. (यू.)-अध्यक्षेण तथा मुख्यमन्त्रिणा नितीशकुमारेण सह तस्य निवासस्थाने मिलितवन्तः। भाजपेति दलस्य राज्य-अध्यक्षः डा. दिलीप जायसवालः अपि सायङ्काले मुख्यमन्त्रिणा सह मिलितवान्।

**केन्द्रीयगृहमन्त्री अमितशाहः**

केन्द्रीयगृहमन्त्री अमितशाहः अद्य हरियाणा-राज्यस्य फरीदाबाद-नगरे भविष्यति उत्तरक्षेत्रपरिषदः (एन्. जेड्. सी.) सभायाः अध्यक्षता करिष्यति। अस्यां सभायां पञ्जाब्-हरियाणा-हिमाचलप्रदेशाणां मुख्यमन्त्रिणः, दिल्ली-जम्मू-कश्मीर-लद्दाख राज्यानां उपराज्यपालाः, चण्डीगढस्य प्रशासकं च समेत्य अन्येपि सभायां भागं ग्रहीष्यन्ति। द्वात्रिंशत्तमे एन्. जेड्. सी. सभायां राज्यसर्वकारेषु समन्वयः, जलविभाजनविषयाः, विकासकार्याणि च चर्चिताः भविष्यन्ति।

**रुषक्रिकेटदलम्**

भारतीयपुरुषक्रिकेटप्रतिस्पर्धायां दक्षिणाफ्रिकादलेन कोलकात्तायाः ईडनगार्डन क्रीडांगणे भारतीयक्रिकेटदलं त्रिंशत् धावनाङ्कैः पराजितम्, भारतीयदलं त्रिनवति-धावनाङ्केषु एव समाप्तम् आसीत्, तत्र च अफ्रिकादलेन भारताय चतुर्विंशत्यधिकशतं धावनाङ्कानां लक्ष्यं प्रदत्तं परन्तु भारतीयदलेन तत् न प्राप्तं, अवधेयं यत् दक्षिणाफ्रीकादलस्य टेम्बाबबुमा तत्र पंचपंचाशत् धावनाङ्कानां सर्वाधिकयोगदानं स्वीयदलाय अकरोत्।

॥ इति वार्ता:॥